International Journal of Applied Research 2018; 4(2): 245-248



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2018; 4(2): 245-248
www.allresearchjournal.com
Received: 21-11-2017
Accepted: 23-01-2018

डॉ0 अश्विनी कुमारः
बेहटा, बेनीपट्टी,
मण्डलम्–मधुबनी, बिहारः, भारत।

**Corresponding Author:**
डॉ0 अश्विनी कुमारः
बेहटा, बेनीपट्टी,
मण्डलम्–मधुबनी, बिहारः, भारत।

# आविश्वे वाल्मीकिरामायणस्य व्यापकत्व–विमर्शः

**डॉ0 अश्विनी कुमारः**

## प्रस्तावना

दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात्।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः।।[1]

ध्वनिकारोक्तदर्शितदिशा परवर्तिभिः कविभिः कथाकारैः नाटककारैश्च रामकथामाश्रित्य रचितेषु प्रबन्धेषु सत्स्वपि काव्यानि नाटकानि च प्रणीतानि प्रणीयन्ते च। प्रायेण रामकथाया मूलं स्रोतो वाल्मीकिरामायणमेव कविभिः नाटककारैश्च स्वकाव्यस्य नाटकस्य वोपजीव्यतया गृहीतमवलोक्यते। वाल्मीकिरामायणन्तु कविना नारदोपदेशेन प्रणीतमादिकाव्यरूपेण प्रथितमिति विदुषां मतम्। पुराणादिष्वपि तत् एव रामचरितमुपवर्णितमिति शोधदृष्ट्या प्रमाणितं तथ्यं प्रतीयते। अतो निश्चेतुं शक्यते यत् वाल्मीकिरामायणमेव रामकथाया मूलमिति।
लोचनपथमतिक्रान्तः दृष्टिवर्त्मबहिर्गतः। वत्सप्रवासदुर्मनायमानाम् रामलक्ष्मणयोः प्रवासेन खिद्यमानाम्। दक्षिणकोसलेश्वरसुताम् कौसल्याम्।

विना वेदं विना गीतां विना रामायणीं कथाम्।
विना कविं कालिदासं भारतं भारतं न हि।।[2]

व्याधवाविद्धाम क्रोञ्चय करूणं विलपन्त्याः क्रोञ्च्याः हृदयद्रावकं विलापं निशम्य परदुःखासहिष्णोः महर्षेः वाल्मीकेः वाक्त्रादकस्मात् निःसृता अनुष्टुप्छन्दोमपि वाङ्निर्क्षरिणी ब्रह्मणो निर्देशात् आदिकाव्यरामायणरूपेण भगवतः श्रीरामस्य लेकमङ्गलकारिचरितरूपेण परिणताऽभवत् या न केवलं ब्रह्मत्तभारतं न वा केवलम् एशियामहाद्वीपम् अपितु सम्पूर्णस्य विश्वमानवस्य जीवनम् आनन्दलहर्या आप्लावितमकार्षीत्। यदि कापि कथा स्वमहिम्ना सम्पूर्ण जगद् व्याप्नोति, तर्हि सा रामकथा एव। एशियामहाद्वीपस्योत्तर– भागेऽवस्थितात्हिमाच्छादितात् साइबेरियाप्रदेशादारभ्य इण्डोनेशियायाः शस्यश्यामलां भूमिं यावत् स्वमहिम्ना साहित्योत्कर्षशालित्वेन अध्यात्मप्रवणत्वेन च वाल्मीकेमुर्खमण्डलात् प्राप्तप्रसवा रामकथा सौन्दर्यसृष्टः चरमोत्कर्षभूता, महनीयकाव्यकलायाः चरमोत्कर्षस्वरूपा च वाङ्मव्याः कलायाः निदर्शनमस्ति। फ्राँसदेशीयेन एकेन समालोचकप्रवरेण महत्याः कलायाः (Great Art) कृते यानि तत्त्वानि निर्दिष्टानि सन्ति तानि सर्वाणि समवतरूपेण वाल्मीकिप्रणीतायां रामकथायां वर्तन्ते ''मानवसौख्यस्याभिवृद्धिः, दीनार्तनानामुद्धारः, परस्परं सहानुभूतेः प्रसारः, नूत्नप्रयत्नसत्ययोः अनुसन्धानं येन भूतले मानवजीवनम् उदात्तम् ओजस्वि च भवेत्? ईश्वरस्य महिमा च विभाव्येत्।''[3]

एतस्मादेव हेतोः रामकथा बृहत्तरभारते अन्यत्र जीवनस्य सर्वेषु पक्षेषु प्रसारं प्राप्तवती।

भारतीयमूलाः प्रवासिनो व्यापारिणो राजपरिवारसदस्याः विद्वांसो वा भारतादन्यत्र यत्र क्वचन गतवन्तः, तत्र रामकथामपि नीतवन्तः। विविधेन विधिना तत्र तत्र रामस्य, रामायणस्य, रामकथायाश्च प्रचारं च कृतवन्तः। रामस्तत्र एकः आदर्शचरित्रनायकरूपेण स्वीकृतः। कथायां स्थानीयप्रभावभावनमपि जातम्। दक्षिणपूर्वैशियादेशेषु केषुचित जनाः तथा प्रभाविता अभवन् यथा ते रामं स्वदेशोत्पन्नमेव अमन्यन्त। रामस्य जीवनस्य घटनाः तत्रैव घटिता इव अनुभूयेरन्। तेषु देशेषु स्थानानां, नदीनां पर्वतानाञ्च नामान्यपि रामकथावत् कृतानि, यथा– अयोध्या, सरयूः, गङ्गा चेति। फिजी, मारिशस, गुयाना, द्रिनिद्राद, सुरीनामप्रभृतिदेशेषु, यत्र बहुसंख्यका भारतप्रवासिनो निवसन्ति। तत्र रामस्य तदेव स्वरूपम् न्यूनाधिकरूपेण सुरक्षितमस्ति यत् भरतेऽस्त। तत्रत्यैः जनैः रामस्तथा आत्मीयत्वेन स्वीकृतोऽस्ति यथा रामस्तेषामेव स्वकीयः इतिहासपुरूषो जातोऽस्ति। एषु देशेषु रामकथायाः उपरि स्वकीयजीवनप्रणाल्या प्रभावः आपतितोऽवलोक्यते। तथापि रामस्योपरि यावान् अकिारः भारतस्याहित ततो न्यूनोऽधिकारस्तेषां नास्ति। अत्र मुख्यो हेतुरस्ति निष्ठा या उभयत्र समानाऽस्ति। तेषु देशेषु न केवलं रामविषयकस्य काव्यस्य निर्माणमेवाहिस्त, अपितु तत्र रामलीलायाः, नाटकाभिनयस्य रामजीवनसम्बन्धिनां व्रतादीनाम् आयोजनान्यपि भवन्ति।[4]

चीनदेशे रामकथायाः प्रभावस्य इतिहासः सर्वप्राचीनोऽस्ति। तत्र रामकथायाः प्रवेशः बौद्धग्रन्थद्वयमाध्ययेन अभवत्। सन् 251ई. वर्षे रामायणस्य चीनीभाषायााम् कांग सेन ह्वी महोदयोऽनुवादभकरोत्। अस्य जातकस्य ाम 'अनामकं जातक' मस्ति। अस्य मूल भारतीयं रूपमप्राप्यमस्ति। अपरोऽनुवादः अस्ति– 'दशरथनिदानम्', यः 472 वर्षे चीनीभाषायां कृतः। अत्र रामायणस्य सर्वाणि पात्राणि सन्ति, किन्तु सीताया उल्लेखो नास्ति। चीनी–उपन्यासपरम्परायां 'वानर' नामकः एकः सुविख्यातः उपन्यासो रचितोऽभवत्, यत्र हनुमद्द्वारा सीतान्वेषणस्य संकेतो लक्ष्यते। चीनीलोककथासु हनुमच्चरित्रम् व्याप्तमस्ति।

षष्ठशताब्द्याः पूर्वोर्द्धे सिंहलनरेशेन कुमारदासेन रामकथामाश्रित्य जानकीहरणामककाव्यं व्यरचि। द्वादशशताब्द्यो केनचिद्ज्ञातनाम्ना लेखकेन अस्य सिंहलभाषायामनुवादो व्याधायि सिंहलभाषाविरचितासु बहुषु रचनासु अस्य प्रशंसापूर्णोल्लेखो लभ्यते विंशशताब्द्यां रामायणस्य सिंहलभाषाविरचितासु बहुषु रचनासु अस्य प्रशंसापूर्णोल्लेखो लभ्यते। विंशशताब्द्यो रामायणस्य सिंहलभाषानुवादः सी.डॉन बैरिष्टयनामहोदयेन कृतः, यस्य आधुनिक सिंहलीनातककारेण जॉन डी.सिल्वा महोदयेन रामायणस्य रूपान्तरं विधाय सिंहलदेशे रामायणकथामयोऽकारि। तत्र रामायणे वर्णिताः आदर्शाः तद्देशस्य निधित्वं गताः। सीतायां विद्यमानाः गुणाः इण्डोनेशियावत् सिंहलदेशेऽपि आदर्शीभूताः। सीतायाः अग्निपरीक्षाकालिकी स्नेहाप्लाविता शान्तमुद्रा तस्याः दिव्यगुणानामभिव्यक्तिरस्ति। चित्रलेखने, मूर्तिकल्पने, पाषाणप्रतिमासु च तादृशी एव मुद्रा अाँता वर्तते।

कम्बोज (Combodia) देशे सप्तमशताब्द्यां समुपलभ्यमानेः। रामायणेद्धरणैः स्पष्टं प्रतिभाति स्पष्टं प्रतिभाति यत् रामकथा कम्बुजजीवनस्य अपरिच्छेद्यम् प्रतीकं जातमासीत्। विशालेषु स्मारकेषु तक्षितानि रामायणी–शिल्पानि कम्बोजदेशस्य ऐतिहासिकघटनासु प्राणर्सांरं विद्धाति। सप्तमजयवर्मन् महोदयात् परं 'रामकेर' इति रामायणं कम्बोजजीवनस्य अभिन्नमंमिवाभवत्। भित्तिचित्रेषु आलेखनेन, अभिनयेन, प्रतिग्रामं ग्रामं भ्रामं कथावाचकैः रामकथावाचनेन च रामकथा सर्वतः परिव्याप्ताऽभवत्। अत्रेदं विशेषतयोल्लेखनीयमस्तियत् आंकोरे विद्यमाने विशालवैष्णवमन्दिरे उत्कीर्णम् रामायणम् योगीश्वर कविविरचित– रामायण– काकविन्' इत्यनेन सह सादृश्यं बिभर्ति। दक्षिणपूर्वेशियाप्रदेशे रामायणस्य प्रचारे प्रसारे च इण्डोनेशियादेशस्य विशिष्टं योगदानमस्ति। तेन रामायणस्य अर्न्तराष्ट्रियं महत्त्वं प्रतिष्ठापयितुं महानुपक्रमो विहितः। नवमशताब्द्यां रामायणं इण्डोनेशियादेशस्य भव्ये शिवालये 'चंडी' लोरो जोङ् राङ् इति अथवा 'चण्डीप्राग्वानान्' अत्र उत्कीर्णमभवत्। 1379 वर्षीय 'पानाताशन्' मन्दिरेऽपि रामायणं बाह्यभित्तिषु उत्कीर्णमभवत्। तत्र कलायाः स्थानीया 'बायाङ्' सन्ति। तत्र हनुमत्सम्बन्धिनः प्रसं विशेष रूपेण चित्रिताः सन्ति। अनेन एवं प्रतीयते यत्र रामायणस्य केचन प्रसां अत्यधिकं लोकप्रियाः आसन्। तेषामेव अभिनयोऽप प्राधान्येन महता उत्साहेन च अभवत अधुनापि भवति।

थाईलैण्डदेशो यद्यपि बौद्धदेशोऽपि किन्तु रामस्यापि भक्तोऽस्ति। थाई रामायणस्य नाम 'रामकियेन' अर्थात् 'रामकीर्तिः' अस्ति। अस्य कथाविषयः मूलतः वाल्मीकिरामायणदेव गृहीतोऽस्ति। कथानकस्य भारतीयमूलत्वेऽपि रामायणमिदं स्वदेशगुणवैशिष्ट्यादिभिः। संवलितं कृतमस्ति। अतएव रामः थाईदेशे एव उत्पन्नः तज्जीवन थाईदेशे एव घटिताः –

यत्नवन्तो यवद्वीपं सप्तराज्योपशोभितम्।
सुवर्णयप्यकद्वीपं सुवर्णकरमण्डितम्।।
यवद्वीपमतिक्रम्य शिशिरो नाम पर्वतः।
दिवं स्पृशति श्रृङ्.गेन देवदानवसेवितः।।[5]

ब्रह्मदेशः (बर्मा) सुवर्णभूमिः, सुमात्रा–जावा–वालीप्रभृतयो द्वीपाः। सुवर्णद्वीपशब्देन व्यपदिष्टाः आसन्। जावा–बालीपरम्परायां 'एरलंगः' विष्णोखतपररूपेणाभिमत आसीत्। उभयतः लक्ष्मीयुक्तः गरुडवाही विष्णुः सम्राजो राजमुद्रायाम् अंकित आसीत् एकादशशतके। अष्टादश–ऊनविंशशताब्योः कालः प्राचीन जावी–साहित्यस्य पुनर्जागरणकालो मन्यते। शास्त्रनगरेण यशादिपुरप्रथमेत्यपरनामधेयेन कविना सरितकाण्डनाम्नी रामकथा अस्मिन्नेव काले रचिता। दशम पञ्जदशशताब्दीमध्ये जावाद्वीपस्य प्राचीनकवि लिपौ निबद्धं संस्कृतबहुलं वाङ्मयं ककविन् (काव्य) नाम्ना प्रख्यातमस्ति। शिण्डोकस्य शासनकाले (919–47) योगीश्वर द्वारा प्राणीन्तं 'रामायण ककविन्' इति काव्यम् यशादिपुरप्रथमेन सरितकाण्डनाम्ना प्रस्तुतम्। तात्पर्यतः सम्राट् शिण्डोकस्य राज्यकालात् ऊनविंशताब्दीं यावत् रामकथामूलकं प्रभूतं साहित्यं जावाद्वीपे बालीद्वीपे च रचितम्। योगीश्वरप्रणीतं 'रामायण काकविन्' इति काव्यं रामकथामुकफटमणिरिव राराज्यते। एतद् काव्यं तदुद्गमभूतेः भारतस्य थाईलैण्डस्युलाद्भोसस्य (फा–लॉक, फॉलॉय= प्रिय लक्ष्मण, प्रियराम) च परम्परायाः महनीयो घटकः स्वीकर्तुं शक्यते। षड्विंशतिः सर्गात्मकं 2778 श्लोकेषु संस्कृतच्छन्दोभिर्निबद्धमेतत्काव्यं काव्यसौन्दर्यदृष्ट्या विशालतया च जावासाहित्यस्य सुमेरूरिव अभ्युपगम्यते। अस्य मूलकथा वाल्मीकिं भट्टिं चानुसरति। क्वचित्तु छायानुवाद इव प्रतिभाति। यथा–

न तज्जलं यन्न सुचारूपङ्.कजं
न पङ्.कजं तद् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्जयः कलं
न गुञ्ज ति तन्न जहार यन्म नः।।
सक्वेङ् निकङ् तलम तन् हन् तन् पतुञ्ज्ङ्
तुञ्ज्ङ् न्य तन् हन् कुरङ् पदमेसि कुम्बहः।
कुम्बङ् न्य कप्व मुनि तन् हन् तन् पशब्द
शब्द न्यं कर्णसुक् तन हन् तन् मनोज्ञ।।[6]

योगीश्वरः महाराजबलितुगस्य आश्रितः कविरासीत्। स विविधशास्त्रपण्डितः, आजन्मब्रह्मचारी मुमुक्षुश्चासीत्। रामकथायाः प्रणयनं तेन भुवनमंगलाय जनानुरागाय च विहितम्। अपरो वाल्मीकिरेवासीत् सः। काव्येऽस्मिन् स्थानीय 'कवि' भाषया सह संस्कृतभाषाशब्दानामपि बाहुल्येन प्रयोगोऽवलोक्यते। छन्दांसि तु संस्कृतस्यैव सन्ति, वर्णनशैली अपि संस्कृतकाव्यानुप्राणिताऽस्ति। अत्रेदं विशेषरूपेणोल्लेखनीयतामर्हति यत् भारतीयेन संस्कृतविदुषा प्रख्यातकविना श्रीमता अभिराजराजेन्द्रमिश्रेण महता परिश्रमेण यवद्वीपीयां प्राचीनां नवीनां च भाषामधीत्य पूर्णनिष्ठापूर्वकं 'रामायणककविन्' इति महनीयस्य काव्यस्य हिन्दीलिप्यन्तरणं विधाय हिन्दीभाषानुवादो विहितः, 199 खैष्टाब्दे काव्यमिदं प्रकाश्यं च नीतम्।

मलेशियादेशस्य अर्वाचीनरामकथायाः प्रतिनिधभूतो अन्थोऽस्ति 'हिफायत सेरीराम' इति। अस्य रचना 1400–1500 मध्येऽभवत्। ग्रन्थेऽस्मिन् रावणचरितादारभ्य सीतानिर्वासनान्तरं सीतारामयोः मिलनपर्यन्तं कथा वर्तते। अत्र सर्वत्र वाल्मीकीयमरामायणसमानता नास्ति। कोर्षांन विषयाणां रामायणे सर्वथा अभावो वर्तते। तथापि एतत्स्रोतोऽभारतीयमिति वक्तुं न शक्यते। केषांत् समीक्षाकानांमतेन अंशाः प्रसंगा वा आनन्दरामायणे कथासरित्सागरे वा समुपलभ्यन्ते। अस्याः रामकथाया उपरि रामायणकविनः इस्लामधर्मस्य वा कश्चित् प्रभावः स्वाभाविकः। ग्रन्थोऽयं छायालीलानामाधारोऽस्ति। छायानाटकस्य रूपद्वयं वर्तते ''वायङ्न्स्याम' 'वायङ् जावा' च। अनयोः भेदमूलकं वैशिष्ट्यं स्पष्टमस्ति। मलेशियारामणस्य विविधं रूपान्तरमीस्त। येन तत्रत्यलोकपरम्परायामस्य लोकप्रियत्वं साधु सिध्यति। मलयोशियादेशे'' सुत्रधारः'दालाङ्' शब्देन व्यपदिशयते। एकस्मिन् वर्षाबधौ असौ 200–300 वारमभिनयं करोति। तस्याभिनयस्य प्रयोजन मनोरजनमांत्र नास्ति् अपितु तस्य धर्मिक महत्वमप्यस्ति। यतो हि छायानाटकोपकमात् पूर्व पूजा विधीयते सुखसाम्मनस्यार्थ जनकल्याणार्थ च देवनामावाहंन च विधायते।

ब्रह्मदेशे(वर्मा) ऽपि रामाणस्य प्रसारः अनेकशताब्दीभ्यः पूर्वतोऽस्ति। बर्मानरेशक्यान्धित्थामहोदयो(1084–1112) रामायणविषये ऽति– शयरूचिमानासीत्। स आत्मांन रामस्य बंशजममन्यत। वमदिशे रामाणस्याधुनिको ऽभिनयः 1768 ई. वर्षे प्रारमत। अधुनपि एषो रामकथामशियत्य बमीभाषायां'' यामप्वे'' नामकेषु नायकेषु नाटकेषु अभिनेता कृतित्रमं मुखं धारयीत तस्य विधिपूर्वकं पूजापूर्वकं पूजामपि विद्यते। इदं खुल भारतवर्षे ऽ पि मुकुटपूजारूपेण दृशयते।

रामकथतिब्बतमाध्यमेन उतरदिशि साइबेरियाप्रदेशं यावत् पप्रपत्। तनुहाहगुहासु सप्तमशताब्द्याः नवमशताब्द्याशच तिब्बतीयं पपाण्डुलिपिद्वयमुप– लब्धं, यदनुसोरण रामायणस्य शाखाद्वयस्य परिचयो लभ्यते। पञ्चदशशताब्द्यां शाङ्मुड्याछोवाड.,द्रूक्याइपाल् महोदयःतिब्बतीभाषायाम् छन्दोबद्धं रामायणं विरचितवान्। काव्यादर्शस्य सुभाषितरत्ननिधेश्च तिब्बतीटीकायामति साइबेरियाप्रदेशम्। मंगोलदेशात् पशिचमभिमुखं प्रसरन्ती रामकथा रूसदेशीयवोल्शामद्याः तटे प्रासरत। तत्रत्यहात्मिगभाषारचिता एका रामायण हस्तीलिपिः सी.एफ.गोल्ट्रटुन्स्कीमहोदयस्य पत्रेषु सुरिक्षतासित। पत्राणि चेमनि सोवियतसंग्रस्य विज्ञानविहारस्य उलान्वातः स्थो विद्वान प्रो. दाम्बिन् सुरेनु

साम्प्रतंभास्कोविविद्यालये लेनिनग्रादविश्वविद्यालसे च रामाणविषयक साहित्यस्य तस्य लोकरूपाणाञ्च इतिहासस्य प्रणयने निरतोऽस्ति। मन्ये तत्पूर्तमपि स्यात्।
तिब्बतभाषायां रामकथायाः रचना अष्टमशताब्द्यां नवमशताब्द्यां वा प्रारब्धा। तनु–हुआङ्.ग. –नामके स्थाने बह्यो हस्तलेखप्रतयः समुपलब्धाःयाः क्वचित् क्वीचत्. त्रटिताः सन्ति। परन्तु सर्व सम्मेलय रामायणकथायाः क्वचित्. त्रुटिताः सन्तिः। परन्तु सर्व सम्मेल्य रामायणकथायाः रूपरेखा संविधातुं शक्यतें। एंव प्रतीयते यत् तिब्बती रामकथाः मूलं वाल्मीकिरामायणं नास्ति अपितु काचित् अन्या रामकथास्ति।

निष्कर्षः
एवञ्च वाल्मीकिरामाणस्य प्रचारः न केवलं भारते अपितु आविश्वे प्रचारो दृश्यते। भारते तु प्रतिगृहं रामायणमस्ति। प्रायः विश्वेऽपि एवमेव स्थितिः रामायणस्य व्यापक्ता विषये स्यादिति।

संदर्भाः

1. काव्येशास्त्रेतिहासः, पृ0 सं0– 12–13।
2. तत्रैव पृ0 सं0– 17।
3. संस्कृतसाहित्येतिहासः, पृ0 सं0 – 42।
4. वाल्मीकि के श्रीराम भूमिका पृ0 सं0– VIII – X।
5. तत्रैव।
6. रामायण काकविन्–2/19।